National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2025; 1(60): 122-124
© 2025 NJHSR
www.sanskritarticle.com

**ड. मधुस्मिता पाढी**
सहायकाचार्या, अतिथिः,
रमादेवी महिला विश्वविद्यालयः,
भुवनेश्वरम्

**Correspondence:**
**ड. मधुस्मिता पाढी**
सहायकाचार्या, अतिथिः,
रमादेवी महिला विश्वविद्यालयः,
भुवनेश्वरम्

# भारतीयपाण्डुलिपिनां लेखनाधाराणामुपरि एका समीक्षा

**ड. मधुस्मिता पाढी**

**शोधसारः-**

महर्षिकपिलेन उक्तः प्रसिद्धः अयः श्लोकः विश्वस्य सर्वासु संस्कृतिषु भारतीया संस्कृतिः प्राचीनाश्रेष्ठा सर्वोत्तमा चेति प्रमाणं करोति ।इयं संस्कृतिः वेववेदाङ्गोपनिषद्-धर्मशास्त्र-रामायण-महाभारत-पुराणकाव्यनाटकैः रुद्धिमन्ता अस्ति ।ज्ञानविज्ञानैः परिपूर्णा इयं संस्कृतिः । यथा -

**सत्यमहिंसादिगुणैः श्रेष्ठाविश्ववन्धुत्वशिक्षिका।**
**विश्वाशान्तिसुखाधात्री भारतीया हि संस्कृतिः।।**

संस्कृतिः अज्ञानान्धकारं दुरीकृत्य समाजं ज्ञानमार्गे परिचालयति ।पुरा भारतीयज्ञानपरम्परा श्रुति-स्मृत्याधारिता आसीत् ।कालक्रमे यदा लिपेः आविष्कारः सञ्जातः तदा ज्ञानस्य स्थायीकरणार्थं तथा अस्य सुरक्षानिमित्तं तथा अस्य सुरक्षानिमित्तं लेखनस्याधारस्वरूपं भोजपत्रं, तालपत्रं, प्रस्तरं, मृत्तिकादीनां प्रयोगः क्रियते। अयं हि लेखः पाण्डुलिपिः इति नाम्ना प्रसिद्धः।

**पारिभाषिकशब्दाः**- पाण्डुलिपिः, संस्कृतिः, पत्रम्, भारतीयलेखम्, लिपि।

**वर्णनीयविषयवस्तु –**

वस्तुतः पाण्डुलिपिः इति शब्दस्य आक्षरिकः अर्थः हस्तलेखः भवति ।एतस्य पर्यायत्वेन बहवः शब्दाः प्रचलिताः सन्ति। यथा – पाण्डुलेखः, मातृका, पुस्तकम्, हस्तलेखः, इत्यादयः। पाण्डु इति शब्दः श्वेतवर्णं पीरवर्णं वा द्योतयति ।लिपिः नामवर्णप्रतीकम्,अक्षरप्रतीकं वा इति।लैटिन् भाषायाम् इयं रंहलेम्तगजू इति उच्यते। रंहल् शब्दस्यार्थः हस्तः। एम्तग्जू अर्थात् लेखनम्। अतः पाण्डुलिपिः नाम हस्तस्य लेखनम्। "भूमौ फलकादौ वा श्वेतपीतवर्णैः यत् लिख्यते स एव पाण्डुलेखः "वृहस्पतिस्मृतौ वर्णनमस्ति यत् –

**अधिकान् ज्ञातयेदर्थान् न्युनांश्चपरिपूरयेत्।**
**भूमौ निवेशयेतावत् यावदर्थो विनिश्चितः।।**

सामान्यतया पाण्डुलिपयः अप्रकाशिताः लेखाः आसन्। कालान्तरे एते लेखाः शिलाताम्रमूर्ति-स्तम्भादीषुलेखनकारणात् शिलालेखः, ताम्रलेखः, स्तम्भलेखः आदिरूपेण प्रतिष्ठिताः अभवत्।

**का नाम लिपिः -**

लिपिः भवति एका लेखनपद्धतिः अर्थात् मनुष्यस्य मनेभावप्रकाशाय यद् लिखिता खोदिता अङ्कता च सा लिपिः। लिपिः आङ्ग्लोभाषायां Script इति कथ्यते। वङ्गप्रदेशे पत्रं माम्ना अभिहितम्। तथा बङ्गप्रदेशे लिपिः इत्युक्ते अबबोधयति भाषायाः विविधतत्त्वानि।

भारतवर्षस्य दृष्टिभङ्गिः सर्वदा आध्यात्मिकी यत् किमपि वस्तुगतकार्यं भवति तद् आश्चर्यम्। यस्मिन् कार्ये किञ्चित् नूतनं भवेते तद् ऐश्वरिकं कार्यम्।

यदि वयं पश्यामश्चेत् लिपिः इति शब्दस्य उत्पत्तिः जाता। लिप् धातोः इन् प्रत्यययोगेन। वैयाकरणानां मतेन लेपनतः लिपिशब्दस्य उत्पत्तिः जाताः। लिप्याः केचन समपर्यायवाचिनः शब्दाः प्राप्यन्ते ।यथा– लिपिः-लिवी-लिपिका-लेखा-अक्षर-स्थान-अक्षर विन्यासादि। इतोऽपि पाणिनिविरचिते अष्टाध्यायी इति ग्रन्थे लिखितं लिपिः इत्युक्ते लिवि-लेखनी-मसि-वर्ण-अक्षर-यवनानी प्रभृति।

**लिप्याः उद्भवः-**

भारतीय लेखनकलायाः उद्भवस्य सम्बन्धे भारतीयपद्धतिः अपि किञ्चित् तथैव दृश्यते। 580 ईशा कालस्य पाषाणखण्डः प्राप्तः,यत्र ब्राह्मी आकृतिः प्राप्यते। तस्य हस्ते ताडपत्रसमूहः अस्ति।एतत् स्पष्टं पुरातात्त्वीयप्रमाणं यत् लेखनकला ब्राहम्यीलिपिना सह सम्बद्धा अस्ति। इतोऽपि लिपेः व्युत्पत्तिसम्बन्धे यदि ज्ञातुमिच्छामि तर्हि नारदस्मृत्यां प्रोक्तम् –

**न करिष्यति यदि ब्रह्मा लिखितं च क्षुरत्तमम्।**
**तदेयमस्य लोकस्य नाभविष्यत् शुभाङ्गतिः।।**

बौद्धग्रन्थे ललिताविस्तारसूत्रे 64 लिपयः सन्ति। तासु प्रथमं ब्राह्मीलिपिः प्रचलिता अस्ति। जैनग्रन्थेषु एक प्रसङ्गः अस्ति। यथा- ऋषभनाथस्य एका बालिका आसीत्। तस्याः नाम बम्पी आसीत्। तां पाठयितुं सः एकस्य लिपेः विकासं कृतवान्। बम्प्याः शिक्षणार्थं तदैवकृता लिपिः ब्राह्मी इत्युच्यते स्म।रामायणसूत्रेषु पनवणसूत्रेषु च 18 लिपिनां वर्णनं प्राप्यते ।याषु ब्राह्मी प्रथमा। वाराहीतन्त्रे लिप्याः पञ्चप्रकाराणां विषये वर्णना वर्तते । यथा -

**मुद्रालिपिः शिल्पलिपिर्लिपिर्लेखनीसम्भवा।**
**गुण्डिकाधुनसम्भुता लिपयः पञ्चधा स्मृताः।।**

अत्र पञ्चलिपयः सन्ति। यथा – मुद्रालिपिः,धूनाक्षरलिपिः च पुनश्च लिपिनां विवर्तनस्य चत्वारः स्तराः सन्ति। यथा- चित्रलिपिः, भावलिपिः, चित्रप्रतीकलिपिः, ध्वनिलिपिः च। अत्र लिप्याः विषये संक्षिप्तवर्णना क्रियते। यथा –

**1.चित्रलिपिः –**

प्राचीनकालस्य जनाः मनसः भावं प्रकटयितुं चित्राङ्कनपद्धतिं गृहीतवन्तः। ते गुहासु कदाचित् वृक्षकन्दरेषु पर्वतेषु च चित्रयन्ति स्म। यथा – स्पेनदेशस्य आलतामिरागुहाचित्रम् ।प्रान्सदेशस्य राभेगुहाचित्रं प्रभृतयः ।पुनः वृक्षशाखासु वस्त्रवन्धनेन,यष्टिषु विन्दवच्छेदनेन, रज्जुषु ग्रन्थिबन्धनेन च लेखनं कथ्यते ग्रन्थलिपिः। एतत् पद्धतिः पेरुदेशे, पालिनेशिया, टाङ्काइका, चिनदेशे च अवलोक्यते।

**2.भावलिपिः -**

अत्र चित्राङ्कनेन रेखामाध्यमेन अङ्किता लिपिः भावलिपिः। एतस्य प्रचलनं मिशर-मेसोपटामिया-क्रिट्-हिट्टि-चीन-अष्ट्रेलिया-लेटिन्-कैलि-फर्निआदेशेषु च आसीत्।

**3.चित्रप्रतीकलिपिः -**

प्रतीकैः चिह्नैः च इयं बोध्यते। एनां शब्दलिपिः अपि कथ्यते।

**4.ध्वनिलिपिः -**

इयं लिपिः सरलः लघुः च भवति ।शब्दस्य प्रतीकस्य स्थाने शब्दस्य मूलाक्षरम् अभिप्रेतम् अत्र प्रत्येकं चिह्नसमूहस्य अक्षरस्य प्रतीकस्य वा अपेक्षया एकस्यैव ध्वनिं निर्दिशति। अस्य एकस्य शब्दस्य लिखितरूपम् अक्षरं भवति। अतः वर्णमाला इति कथ्यते। एतेषां चतुर्णां लिपिनामतिरिक्तमन्याः काश्चन लिपयः दृश्यन्ते। सिरिया तथा उत्तरपश्चिमदिशि-इउगारिट् – विब्लस् – फिनिशय -प्रोटोप्रभृतयः लिपयः प्रचलिताः सन्ति।इतोऽपि भिन्नलिपयः सन्ति। यथा – शारदा, देवनागरी, द्राविड, वाला, रोमान्, टुलु।

**पाण्डुलिपिलेखनस्याधारः -**

सर्वेषां भारतीयानामस्माकं खेदविषयोऽयं यत् अस्माक् पूर्वजैः विविधेषु ऐतिहासिककालेषु लिखितानां मातृकाणां का वा मुख्याः प्रतिलिपयः आसनिति न जानीमः। तत्कालीनसमयेऽपि विवादविषयः आसीत् ।ग्रन्थकर्त्तुः लिखितहस्तप्रतिं प्राप्तुमशक्यमेव भवति। एवं स्थिते सति सुप्रसिद्धग्रन्थेषु निक्षिप्ता संस्कृतिः कालान्तरे विनष्टा भवतीति सम्यग्विचिन्त्य वहवः विद्वांसः तान् ग्रन्थान् प्रतिलिपीकर्तुं प्रयत्नं कृतवन्तः। किन्तु ताल-भुर्ज-काष्ठ-कर्गद-सुवर्ण-रजत-प्रतिलिपयः विरच्यन्ते स्म। पुरा जनाः ताम्रादिवस्तुनाम् उपरि ग्रन्थान् विलिख्य संस्कृतेः परिरक्षणं कुर्वन्तः आसन् प्रतिलिपिकरणावसरे मातृकाणां वैविध्यं क्रमशः प्रस्तुयते। यथा – प्राचीनभारते लेखनस्य प्रमुखसाधनत्वेन तालपत्रं, भोजपत्रं,अगरुपत्रम् आदीनां भूमिका वर्तते। भारते प्राचीनलिपयः महेञ्जोदारो तथा हडप्पासभ्यतायाः प्राप्ताः भवन्ति। तस्मिन् काले तालभूर्जइत्यादिनां पत्राणां व्यवहारं प्रचलितमासीत् ।परन्तु आधुनिकसमये कर्गदपत्रं इत्यस्य प्रयोगं क्रियते ।पुरातनकाले तालभोजादिषु पत्रेषु लिखिताः आसन्।[1]

**तालपत्रम् –**

विश्वेऽस्मिन् विद्यामानाः सहस्राधिकाः ग्रन्थाः तालपत्रेषु अथवा तालपत्रद्वारा रक्षिताः। इयं तु तालपत्रमातृका भारतस्य दाक्षिणात्यप्रान्तेषु अधिकतया उपलभ्यते। तालपत्राणां प्रयोगः अतिप्राचीनः वर्तते।तालप्त्रपाण्डुलिपिः शुष्कतालपत्रेभ्यः निर्मिताः सन्ति। भारतीयमहाद्वीपे दक्षिणपूर्वएशियायां च लेखनस्याधारत्वेन तालपत्रस्योपयोगः भवति स्म। त्रिपिटकग्रन्थः तालपत्रेषु अपि लिखितः अस्ति। संस्कृतपाण्डुलिपिषु तालपत्रैः लिखितः शैवसिद्धान्तग्रन्थः **पारमेश्वरतन्त्रमिति** दक्षिणएशियायाः प्राचीनतम-ग्रन्थः अस्ति। इतोऽपि महाकविना कालिदासेन विरचितम् अक्षिज्ञानशाकुन्तलम् इत्यस्मिन्नाटके नायिका शकुन्तला नखैः कमलपत्रे प्रणयलेखं दुष्यन्तस्य कृते लिखति यथा -

**तव न जाने हृदयं मम पुनर्मदनो दिवाऽपि रात्रिमपि।**
**निष्कृप तापयति बलीयस्तवहस्तमनोरथानि अङ्गानि।।**[2]

**भुर्जपत्रम् –**

भुर्जवृक्षस्यान्तर्भागं स्वीकृत्य पत्ररूपेण कृत्वा लेखनयोग्यं कुर्वन्ति स्म। एतानि पत्राणि औत्तरप्रान्ते वहुत्रदृश्यते। एतानि पत्राणि अत्यन्तं सुकुमाराणि कागजपत्रसदृशानि वर्त्तन्ते। विक्रमोर्वशीये कालिदासे-नोक्तम् – **भुजङ्गं निर्मित् भुर्जपत्रोऽयमक्षरविन्यासः** इति। भोजपत्रेषु लिखिताः आधिकांशग्रन्थाः कश्मीरतः केचन ओडिशातः सन्ति।

खरोष्ठीलिप्यां भोजपत्रलिखितं धम्मपदमिति प्राचीनतमं पुस्तकम् उपलब्धमस्ति। कर्गदस्य आविष्कारद्वारा आधुनिकम-नुष्याणाम् उपरि वहु प्रभावः जातः। कर्गदपत्रं चैनादेशस्य **Tsuilyn** इत्यनेन महाभागेन 405 ख्रीष्टाब्दे कागजपत्रस्य लेखपत्रं विहितम्। कागजपत्रस्य कातलि अथवा राजपत्री इत्यादीनि नामान्तराणि वर्तन्ते। प्रभारकचरितम् इत्यस्मिन् ग्रन्थे काकल, काकली इति नाम वर्तते। कर्गदस्य उपलब्धिः ज्ञानविज्ञानसंस्कृतिः परम्परादिषु महत् योगदानं कृतवान्।

**धातुः -**

प्राचीनकाले पाण्डुलिपिलेखनस्य अन्यतमाधारः आसीत्। धातुः स स्वर्णरजतलौहताम्रादिषु पाण्डुलिपिनां लेखनं क्रियते।राज्ञां परिचयः राज्यस्य विवरणी, तेषां यशकीर्त्यादीनां वर्णना उपर्युक्तधातुषु पाण्डुलिपिषु प्राप्यते ।प्राचीनमध्ययुगीयभारते लेखनार्थं ताम्रस्य प्रयोगः सर्वाधिकः आसीत्।मानवजातेः विकासस्य क्रमेण लौहस्योपरि देहल्यां स्थितस्य कुतुवमीनारस्य पार्श्वे लौहस्तम्भे गुप्तब्राह्मीलिपिनां एकस्य राजाचन्द्रस्य षड्पंक्त्यात्मकः संस्कृतशिलालेखः अस्ति। उत्तराखण्डस्य गोपेश्वरमन्दिरस्य प्राङ्गणे निहितस्य लौहत्रिशुले सप्तमशताब्द्याः लिप्यां संस्कृतग्रन्थः अभिलेखितः अस्ति। अचलेश्वरमन्दिरे स्थितस्य लौहत्रिशुलस्योपरि ईषापूर्व 1411 वर्षस्य शिलालेखः अस्ति।इतोऽपि पीतलमूर्तिनां पादपीठेषु कांस्य घण्टाषु च शिलालेखाः दृश्यन्ते।

**प्रस्तरशिलालेखः –**

प्रस्तरेषु शिलासु वा यः लेखः लिख्यते, तदेवलेखः शिलालेखः इत्युच्यते ।एतते लेखनपरम्परा अथिप्राचीना। शिलालेखषु, स्तम्भेषु, मूर्तिषु,पाषाणकलषादिषु लेखनं क्रियते। देवतानां स्तुतिपरकलेखनं उत्किर्णावसरे शिलायाः स्निग्धतां प्रति ध्यानं दीयते स्म। शिलालेखाः अतीव सावधानपूर्वकं खोदिताः आसन्। राजाभोजस्य **कुर्माष्टकम्** इति प्राकृतकाव्यं शिलासु लिखितं प्राप्तम्। महाकविकालिदासेन मेघदूतमिति खण्डकाव्ये शिलायाः उपरि चित्राङ्कनस्य वर्णना क्रियते।

**त्वामालिख्य प्रणयकुपितां धातुरागैः शिलायाम्।**
**आत्मानं ते चरणपतितं यावदिच्छामि कर्तुम्।**
**अस्तैस्तावमन्मुहुरूपचितैर्दृष्टिरालुप्यते मे।**
**क्रुरस्तस्मिन्नपिनसहते सङ्गमं नौ कृतान्तः।।**[3]

शिलालेखं विहाय स्तम्भलेखः परम्पराऽपि प्राचीना अस्ति। स्तम्भलेखाः अनेकप्रकाराः सन्ति। ते यथा – ध्वजस्तम्भः, जयस्तम्भः, कीर्तिस्तम्भः, सतिस्तम्भः, वीरस्तम्भः, युपस्तम्भादयः।

**चर्म –** चर्मणोऽपि लेखनसाधनत्वेन क्वचित् उपयोगः भवति। बौद्धग्रन्थेषु बकशुकरमेषादीनां वा चर्मभिः अयं चर्मपत्रः निर्मितः आसीत्। बौद्धग्रन्थेषु तस्य साधनत्वं नोल्लिखितम्। तथापि धार्मिकाशुद्धिभावनात्वेन तस्योपयोगीऽतीव सीमितः। क्वचित्पाठार्थं ग्रन्थस्यावरणत्वेन पट्टित्वेन वा मोगलसमये तस्य प्रचारोऽभूदिति कथ्यते।

**मशी –** भारते पाण्डुलिपिनां कृते मशीप्रयोगानां व्यावहारमपि क्रियते। कृष्णवर्णस्य मशीनां प्रयोगः लेखनेषु अधिकतया दृश्यते। मशी कज्ज्वलेन निर्मिता अस्ति। काव्यानाटकलेखनार्थं मशीप्रयोगः दृश्यते। यथा- महाकविवाणः, सुबन्धुः, भासः, श्रीहर्षादयः कवयः अस्याः प्रयोगं कृतवन्तः।

**उपसंहारः-**

मानवीयेतिहासस्य संरक्षणे लेखनसामग्रीणां भूमिका महती वर्तते। आधुनिकसमाजे अस्याः सुरक्षा अत्यन्तमावश्यकी। लेखनसामग्रीषु एव विश्वसंस्कृतिः परम्परा, लिपयः, भाषा तथा मानवीयचिन्ताधाराः सुरक्षिताः सन्ति। लेखनस्य इयं धारा सहस्रवर्षात् पूर्वं प्रचलितमस्ति। इदानीन्तनयुगः सङ्गणकयुगः अस्ति। साम्प्रतम् अस्योपयोगः प्रायः सर्वेषु कार्येषु क्रियते।पाण्डुलिपिलेखने अपि अधुना सङ्गणकस्य प्रयोगः अन्येषु सर्वेषु साधनेषु वहुलतया क्रियते।पाण्डुलिपिप्रकाशने अस्य उपयोगः महत् सौबिध्यं विदधाति। आधुनिकभारते मातृकालेखनार्थं अस्य अऽतीवोपयोगः क्रियते स। अनेके शिलालेखाः, ताम्रपत्राणि, च पूर्वकालीनाः प्राप्यन्ते, ऐतिहासिकं महत्त्वं च भजन्ते ।एषा लिपिः केषुचित् स्थानेषु अक्षर-कर्गद-तालपत्र-चर्मरूपेण अपि च ताम्र-शिला-लिप्याः रूपेण अपि प्रयुक्ताः सन्ति ।इयं लिपिः विभिन्नेषु देशेषु भिन्नभाषाषु अनेक भिन्ननामभिः ज्ञायते। तथापि वक्तुं शक्यते यत् अस्माकं पूर्वजाः विद्वांसः लिपिविषये ज्ञातुं एतत् पद्धतिं स्वीकृतवन्तः। यत् अत्र भिन्नभिन्नरूपेण अस्ति।

**सहायकग्रन्थसूची –**


1. शिवस्वरूपसहाय - भारतीयपुरालेखों का अध्ययन
2. पाण्डुलिपिविज्ञानम्- डा.सत्येन्द्रः-राजस्थान हिन्दीग्रन्थअकादमी, 2013
3. संस्कृतशोधप्रविधिः-डः सत्यनारायणआचार्यः, 2012
4. भारतीयपुरालिपिविद्या-दिनेशचन्द्रसरकार-विद्यानिधिप्रकाशनम्, देहली
5. अभिज्ञानशाकुन्तलम् - गुरुप्रसादशास्त्री– चौखम्बासुरभारती-प्रकाशनम्, 2013
6. विक्रमोर्वशीयम्- श्रीअवनिकुमारपाण्डेयः – चौखम्बासुरभारती-प्रकाशनम्, 2016
7. मेघदूतम्-डः बलवान् सिंह यादवः- चौखम्बासंस्कृतभवनम्, 2017
8. संस्कृतसाहित्य लिपिसन्दर्भ राष्ट्रभाषा-ड. मनोजपाण्डेयः


**संदर्भ ग्रन्थ -**

[1] आ.शा (3.28)

[2] अ.शा 19

[3] उत्तरमेघः 47